ॐ क्रीँ लक्ष्मि! देहि सौभाग्यं सर्व्वत्रैलोक्यमोहनम्॥
दुरालभा वचा कुष्ठं कुङ्कुमञ्च शतावरी।
तिलतैलेन संयुक्तं योनिलेपाद्वशो नरः॥
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियाः।
सुभगा स्यात् सा च रुद्र! पतिर्दासो भविष्यति॥
माहिषं नवनीतञ्च कुष्ठञ्च मधुयष्टिका।
सौभाग्यं भगलेपाच्च पतिर्दासो भवेत्तदा॥
मधुयष्टिञ्च तैर्द्द्याद्गोक्षीरं कण्टकारिका।
एतानि समभागानि पिबेदुष्णेन वारिणा॥
चतुर्भागावशेषेण गर्भसम्भवमुत्तमम्॥
मातुलुङ्गस्य वीजानि क्षीरेण सह भावयेत्॥
तत्पीत्वा लभते गर्भं नात्र कार्य्या विचारणा।
मातुलुङ्गस्य वीजानि मूलान्येरण्डकस्य च॥
घृतेन सह संयोज्य पाययेत् पुत्रकाङ्क्षिणीम्।
अश्वगन्धाघृतं दुग्धं क्वथितं पुत्रकारकम्॥
पलाशस्य तु वीजानि क्षौद्रेण सह पेषयेत्।
रजस्वला तु पीत्वा स्यात् पुष्पगर्भविवर्ज्जिता”॥
इति गारुड़े १८२ अध्यायः॥ *॥

हरिरुवाच।

“हरितालं यवक्षारं पत्राङ्गं रक्तचन्दनम्।
जाती हिङ्गुलकं लाक्षा पक्वतैलेन पेषयेत्॥
हरीतकीकषायेन घृष्ट्वा दन्तान् प्रलेपयेत्।
दन्ताः स्युर्लोहिताः पुंसः श्वेता रुद्र! न संशयः॥
मूलकं खेदमश्नौ तु रसं तस्य प्रपेषयेत्।
कर्णयोः पूरणात्तेन कर्णस्रावो विनश्यति॥
अर्कपत्रं गृहीत्वा तु मन्दाग्नौ तापयेच्छनैः।
निष्पीड्य पूरयेत् कर्णौ कर्णशूलं विनश्यति॥
प्रियङ्गुमधुकाम्बष्ठाधातक्युत्पलपत्तिभिः।
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन च॥
पचेत्तैलं तथा शुष्कक्षारो हिङ्गु महौषधम्।
शतपुष्पा वचा कुष्ठं दारु शिग्रु रसायनम्॥
सौवर्चलं यवक्षारं तथा सर्ज्जिकसैन्धवम्।
भुत्रग्रन्थि विड़ं मुस्तं मधुयुक्तं चतुर्गुणम्॥
मातुलुङ्गरसस्तद्वत् कदल्याश्च रसो हि तैः।
पक्वतैलं हरेदाशु स्रावादींश्च न संशयः॥
कर्णयोः कृमिनाशः स्यात् कटुतैलस्य पूरणात्।
हरिद्रा निम्बपत्राणि पिप्पल्यो मरिचानि च॥
विड़ङ्गं भद्रमुस्तं सप्तमं विश्वभेषजम्।
गोमूत्रेण च पिष्ट्वैव कृत्वा च वटिकां हर!॥
अजीर्णाद्दुर्व्वेचैका द्वयं विष्टम्भिकापहम्।
पटलं मधुना हन्ति गोमूत्रेण तथार्व्वुदम्॥
एषा च शङ्करी वर्त्तिः सर्व्वनेत्रामयापहा”।
इति गारुड़े १८३ अध्यायः॥ *॥

हरिरुवाच।

“वचा मांसी च विल्वञ्च तगरं पद्मकेशरम्।
नागपुष्पं प्रियङ्गुञ्च समभागानि चूर्णयेत्॥
अनेनाधूपितो मर्त्त्यः कामवद्विचरेन्महीम्।
कर्पूरं देवदारुञ्च मधुना सह योजयेत्॥
लिङ्गलेपाच्च तेनैव वशीकुर्य्यात् स्त्रियं किल।
मैथुनं पुरुषो गच्छेत् गृह्णीयात् स्वकमिन्द्रियम्॥
वामहस्तेन वामञ्च हस्तं यस्याः स्त्रिया-क्षिपेत्।
व्यालिप्ता स्त्री वशं याति नान्यं पुरुषमिच्छति॥
ओम् रक्तचामुण्डे अमुकं मे वशमानय वशमानय
क्रीँ क्रौँ क्रः फट्।
इमं जप्तायुतं मन्त्रं तिलकेन च शङ्कर!।
गोरचनासंयुतेन स्वरक्तेन वशीभवेत्॥
सैन्धवं कृष्णलवणं सौवीरं मत्स्यपित्तकम्।
मधु सर्पिः सितायुक्तं स्त्रीणां वङ्गलेपनम्॥
यः पुमान् मैथुनं गच्छेत् नान्यां नारीं गमिष्यति॥
शङ्खपुष्पी वचा मांसी सोमराजी च फल्गुकम्॥
माहिषं नवनीतञ्च गाढ़ीकरणमुत्तमम्।
सनालानि च पद्मानि क्षीरेणाज्येन पेषयेत्॥
गुटिकां शोषितां कृत्वा नारी योन्यां प्रवेशयेत्।
दशवारं प्रसूतापि पुनः कन्या भविष्यति॥
सर्षपाश्च वचा चैव मदनस्य फलानि च।
मार्जारविष्ठाधुस्तूरःश्वोकेशेन समन्वितः॥
चातुर्थकहरो धूपो डाकिनीज्वरनाशनः।
अर्ज्जुनस्य तु पुष्पाणि भल्लातकविड़ङ्गके॥
क्षीवेरकं सर्जरसं सौवीरं सर्षपास्तथा।
सर्पयूकामक्षिकाणां धूपो मशकनाशनः॥
भूलतायाश्च चूर्णेन स्तम्भः स्यात् योनिपूरणात्।
तेन लेपयतो योनौ भगस्तम्भश्च जायते”॥
इति गारुड़े १८४ अध्यायः॥ *॥

हरिरुवाच।

“साञ्जनञ्च घृतं क्षौद्रं लवणं ताम्रभाजने।
घृष्टं पयःसमायुक्तं चक्षुःशूलहरं परम्॥
हरितकी वचा कुष्ठं पिप्पल्यो मरिचानि च।
विभीतकस्य वीजानि हरितालं मनःशिला॥
सर्व्वाक्षिरोगान्नश्येयुरजाक्षीरसमन्विताः।
तत्क्षणात् पुष्पनाशः स्यात् मालतीकुसुमाञ्जनात्॥
विड़ङ्गं सैन्धवं कुष्ठं व्योषं हिङ्गु मनःशिला।
कासे श्वासे च हिक्कायां लिह्यात् क्षौद्रं घृतप्लुतम्॥
पिप्पलीत्रिफलाचूर्णं मधुना लेहयेन्नरः।
नश्यते पीनसः कासः श्वासश्च बलवत्तरः॥
समूलचित्रकं भस्म पिप्पलीचूर्णकं हरेत्।
कासं श्वासञ्च हिक्काञ्च मधुमिश्रं वृषध्वज!॥
नीलोत्पलं शर्करा च मधुकं पद्मकं समम्।
तण्डुलोदकसंमिश्रं प्रशमेद्रक्तविक्रियाम्॥
शुण्ठी च शर्करा चैव तथा क्षौद्रेण संयुता।
कोकिलस्वरएव स्यात् गुलिकाभक्षमात्रतः॥
हरितालं शङ्खचूर्णं कदलीदलभस्मना।
एतद्द्रव्येण चोद्वर्त्त्य लोमशातनमुत्तमम्॥
लवणं हरितालञ्च तण्ड़ल्याश्च फलानि च।
लाक्षारससमायुक्तं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च शङ्खश्चैव मनःशिला।
सैन्धवेन सहैकत्र छागमूत्रेण पेषयेत्॥
तत्क्षणोद्वर्त्तनादेव लोमशातनमुत्तमम्।
शङ्खमामलकीपत्रं धातक्याः कुसुमानि च॥
पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे।
स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः”॥
इति गारुड़े १८५ अध्यायः॥ *॥

हरिरुवाच।

“शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम्।
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते॥
भुक्तो तु शर्करा पीता नवनीतेन बुद्धिकृत्।
गुड़स्य तु पुराणस्य पलमेकन्तु भक्षयेत्॥
प्रत्यहं वर्षमेकन्तु निरन्तरमथो हर!।
स्त्रीसहस्रञ्च गच्छेच्च पुमान् बलयुतो हर!॥
कुष्ठं सुचूर्णितं कृत्वा घृतमाक्षिकसंयुतम्।
भक्षणात् स्वप्नवेलायां बलीपलितनाशनम्॥
अतसीमाषगोधूमं चूर्णं कृत्वा च पिप्पलीम्।
घृतेन लेपयेद्गात्रमेभिः सार्द्धं विचक्षणः॥
कन्दर्पसदृशो मर्त्त्यो भवते नित्यभक्षणात्।
यवास्तिला अश्वगन्धा मुषली शरला गुड़म्॥
एभिश्च वटिकां जग्ध्वा तरुणो बलवान् भवेत्।
हिङ्गु सौवर्चलं शुण्ठीं पीत्वा तु क्वथितोदकैः॥
परिणामाख्यशूलञ्च अजीर्णञ्चैव नश्यति॥
धातकीं सोमराजीञ्च मधुना सह पेषयेत्।
दुर्व्वलश्च भवेत् स्थूलो नात्र कार्य्या विचारणा।
शर्करामधुसंयुक्तं नवनीतं बली लिहेत्॥
क्षीराशी च क्षयी पुष्टिमेवाज्येरतुलां लभेत्॥
कुलीरचूर्णं सक्षीरं पीतञ्च क्षयरोगनुत्।
भल्लातकं विड़ङ्गञ्च यवक्षारञ्च सैन्धवम्।
मनःशिला शङ्खचूर्णं तैलपक्वं तथैव च॥
लोमानि शातयत्येव नात्र कार्य्या विचारणा॥
मालूरस्य रसं गृह्य जलौकां तत्र पेषयेत्।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम्॥
शाल्मलीरसमादाय खरमूत्रे निधाय तम्।
अभ्रागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम्॥
वायसी-उदरं गृह्य मण्डूकवसया सह।
गुटिकां कारयेत्तेन ततोऽग्नौ प्रक्षिपेद्वशी।
एवमेतत् प्रयोगेण अग्निस्तम्भनमुत्तमम्॥
मुण्डीतकवचायुक्तं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्॥
गोरोचनाभृङ्गराजं चूर्णयित्वा घृतं समम्।
दिव्याम्भसस्तु स्तम्भः स्यात् मन्त्रेणानेन वै तथा॥
ॐ ह्रां अग्निस्तम्भनं कुरु। ॐ नमो भगवते जलं
स्तम्भय स्तम्भय सं सं वेक वेक चर चर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते शिव!॥
गृध्रास्थि च गवास्थि च मृतनिर्माल्यमेव च।
अरेर्यो निखनेत् द्वारे पञ्चत्वमुपयाति सः॥
ब्रह्मदण्डी तु पुष्येण खाने पाने वशीकरा॥
यष्टीमधुपलैकेन पक्वसुष्णोदकं पिबेत्।
विष्टम्भिकाञ्च हृच्छूलं हरत्येव महेश्वर!॥
ॐ क्रः जः।
मन्त्रोऽयं हरते रुद्र! सर्पवृश्चिकजं विषम्।
पिप्पली नवनीतञ्च शृङ्गवेरञ्च सैन्धवम्॥
मरीचं दधि कुष्ठञ्च नस्ये पाने विषं हरेत्।
त्रिफलार्द्रककुष्ठञ्च चन्दनं घृतसंयुतम्॥
एतत्पानाच्च लेपाच्च विषनाशो भवेच्छिव!।
पारावतस्य चाक्षीणि हरितालं मनःशिला॥
एष योगो विषं हन्ति वैनतेय इवोरगान्॥
सैन्धवं त्र्युषणं चूर्णं दधिमध्वाज्यसंयुतम्।
वृश्चिकस्य विषं हन्ति लेपोऽयं वृषभध्वज!।
ब्रह्मदण्डीतिलान् क्वाथ्य चूर्णं त्रिकटुकं पिबेत्।
नाशयेद्रुद्र! गुल्मानि निरोधं रक्तमेव च॥